सृष्टम्। प्रधर्षणमभिभवः। विषमाश्च चेष्टाः बलवद्विग्रहादयः॥ *॥ सन्निकृष्टं निदानमाह।

"एकैकशः सर्व्वशश्च दोषैरत्यर्थमूर्च्छितैः।
मानसेन च दुःखेन स पञ्चविध उच्यते॥
विषाद्भवति षष्ठश्च यथास्वं तत्र भेषजम्"॥ *॥

तस्य सम्प्राप्तिमाह।

"तैरल्पसत्त्वस्य मलाः प्रदुष्टाः
बुद्धेर्निवासं हृदयं प्रदूष्य।
स्रोतांस्यधिष्ठाय मनोवहानि
प्रमोहयन्त्याशु नरस्य चेतः"॥

अल्पसत्त्वस्य अल्पसत्त्वगुणस्य। मला वातादयः। बुद्धेर्निवासं हृदयं प्रदूष्येति। एतेनाश्रयस्य दुष्ट्या तदाश्रिताया बुद्धेरपि दुष्टिरुक्ता। मनोवहानि स्रोतांसि हृदयाश्रितानि दश। एतानि विशेषतो बोद्धव्यानि। यतश्चरकेण सकलशरीरस्रोतांस्येव मनसोऽधिष्ठानत्वेनोक्तानि। प्रमोहयन्ति विकृतं कुर्व्वन्ति॥ *॥

उन्मादस्य सामान्यं रूपमाह।

"धीविभ्रमः सत्त्वपरिप्लवश्च
पर्य्याकुला दृष्टिरधीरता च।
अबद्धवाक्त्वं हृदयञ्च शून्यं
सामान्यमुन्मादगदस्य लिङ्गम्"॥

धीविभ्रमः शुक्तिकायां रजतज्ञानम्। सत्त्वपरिप्लवः सत्त्वं मनस्तस्य चाञ्चल्यम्। अबद्धवाक्त्वं असम्बद्धभाषित्वम्। शून्यं स्मृतिशून्यम्॥*॥

वातिकोन्मादस्य निदानपूर्व्विकां सम्प्राप्तिमाह।

"रूक्षाल्पशीतान्नविरेकधातु-
क्षयोपवासैरनिलोऽतिवृद्धः।
चिन्तादिदुष्टं हृदयं प्रदूष्य
बुद्धिं स्मृतिं चाप्युपहन्ति शीघ्रम्"॥

प्रदूष्य प्रकर्षेण दूषयित्वा॥ *॥

तस्यैव रूपमाह।

"अस्थानहास्यस्मितनृत्यगीत-
वागङ्गविक्षेपणरोदनानि।
पारुष्यकार्श्यारुणवर्णताश्च
जीर्णे बलञ्चानिलजस्य रूपम्"॥

अस्थाने अनवसरे। हास्यादीनि रोदनान्तानि। जीर्णे आहारे। बलं व्याधेः॥ *॥

पैत्तिकस्य निदानपूर्व्विकां सम्प्राप्तिमाह।

"अजीर्णकट्वम्लविदाह्यशीत-
भोज्यैश्चितं पित्तमुदीर्णवेगम्।
उन्मादमत्युग्रमनात्मकस्य
हृदि स्थितं पूर्व्ववदाशु कुर्य्यात्"॥

हृदि स्थितं पित्तं चितं सञ्चितम्। पुनः अजीर्णकट्वम्लविदाह्यशीतैर्भोज्यैरुदीर्णवेगं सत् उन्मादं कुर्य्यात् पूर्व्ववत् हृदयं प्रदूष्य इत्यर्थः॥*॥

तस्य रूपमाह।

"अमर्षसंरम्भविनग्नभावाः
सन्तर्जनाभिद्रवणौष्ण्यरोषाः।
प्रच्छायशीतान्नजलाभिलाषः
पीतावभाः पित्तकृतस्य लिङ्गम्"॥

अमर्षोऽसहिष्णुता। संरम्भः आरभटी आड़म्बर इति यावत्। सन्तर्जनं परत्रासनम्। अभिद्रवणं पलायनम्। औष्ण्यं गात्रे। रोषो दाहविशेषः। प्रच्छाय इत्यादि छायायां शीतयोरन्नजलयोरभिलाषः॥ *॥

श्लैष्मिकस्य निदानपूर्व्विकां सम्प्राप्तिमाह।

"सम्पूरणैर्मन्दविचेष्टितस्य
सोष्मा कफो मर्म्मणि संप्रवृद्धः।
बुद्धिं स्मृतिं चाप्युपहन्ति चित्तं
प्रमोहयन् संजनयेद्विकारम्"॥

संपूरणैर्भोजनादिभिः। मन्दविचेष्टितस्य व्यायामरहितस्य। सोष्मा कफ इति कफोऽप्युन्मादं करिष्यन् पित्तं सहायमपेक्षते व्याधिस्वभावात्। मर्म्मणि अत्र मर्म्मशब्देन हृदयमुच्यते। विकारमुन्मादरूपम्॥ *॥

तस्य रूपमाह।

"वाक्चेष्टितं मन्दमरोचकश्च
नारीविविक्तप्रियता च निद्रा।
छर्द्दिश्च लाला च बलञ्च भुक्ते
नखादिशौक्ल्यञ्च कफात्मके स्यात्"॥

वाक्चेष्टितं मन्दं वचनमल्पम्। नारीविविक्तप्रियता नारीप्रियता विजनप्रियता च। भुक्ते सति बलं व्याधेः॥ *॥

सान्निपातिकस्य निदानपूर्व्वकं लक्षणमाह।

"यः सन्निपातप्रभवोऽतिघोरः
सर्व्वैः समस्तैः स तु हेतुभिः स्यात्।
सर्व्वाणि रूपाणि बिभर्त्ति तादृग्-
विरुद्धभैषज्यविधिर्व्विवर्ज्यः"॥

स सान्निपातिक उन्मादः। सन्निपातग्रहणेनैव सर्व्वात्मकत्वं लब्धम्। पुनः सर्व्वैरिति यत्कृतं तद्रजस्तमःप्रापणार्थम्। तेन रजस्तमोभिर्मिलितैरित्यर्थः। तेन वातादयो रजस्तमोभिर्मनोदोषैर्मिलिताः। समस्तैश्च निदानैः कुपिता उन्मादं जनयन्ति। सर्व्वैर्हेतुभिः समस्तैर्मिलितैः स्यात्। यतोऽन्यो व्याधिः सर्व्वैर्हेतुभिर्मिलितैरेव भवतीति नियमो नास्ति। अयन्तु व्याधिप्रभावात् सर्व्वैर्हेतुभिर्म्मिलितैः स्यात्। तादृगुन्मादः विरुद्धभैषज्यविधिः। विरुद्धभैषज्यविधिरिति कोऽर्थः। त्रिदोषजे प्रत्येकं वातादिप्रत्यनीका कार्य्या। सा च परस्परविरोधिनी त्रिदोषं हन्ति किञ्चिदेव द्रव्यमामलकादि तच्चायोगिकम्। अतएव विवर्ज्यः न चिकित्स्य इत्यर्थः॥ *॥

मनोदुःखजस्य विप्रकृष्टं निदानमाह।

"चौरैर्नरेन्द्रपुरुषैररिभिस्तथान्यै-
र्वित्रासितस्य धनबान्धवसंक्षयाद्वा।
गाढ़ं क्षते मनसि च प्रियया रिरंसो-
र्जायेत चोत्कटतरो मनसो विकारः"॥

अन्यैर्हिंस्रादिभिः। गाढ़मतिशयेन। क्षते अभिहते। प्रियया प्राप्तुमशक्यया रिरंसोः पुरुषस्य विकारः उन्मादरूपः॥ *॥

तस्य रूपमाह।

"चित्रं ब्रवीति च मनोऽनुगतं विसंज्ञो
गायत्यथो हसति रोदिति चातिमूढ़ः"।

चित्रमाश्चर्य्यं। मनोऽनुगतं गोप्यमपि। विसंज्ञो विरुद्धज्ञानः। अतीवमूढ़ः अतीवज्ञानशून्यः। अत्र विकल्पो बोद्धव्यः॥ *॥

विषजस्य रूपमाह।

"रक्तेक्षणो हतबलेन्द्रियभाः सदीनः
श्यावाननो विषकृते तु भवेत् परासुः"।

परासुः मृतः॥ *॥

अरिष्टमाह।

"अवाङ्मुखस्तून्मुखो वा क्षीणमांसबलो नरः।
जागरूको ह्यसन्देहमुन्मादेन विनश्यति"॥ *॥

अथ देवादिकृतस्योन्मादस्य सामान्यं लक्षणमाह।

"अमर्त्यवाग्विक्रमवीर्य्यचेष्टो
ज्ञानादिविज्ञानबलादियुक्तः।
प्रकोपकालो नियतश्च यस्य
देवादिजन्मा स मनोविकारः"॥

अमर्त्यवाग्विक्रमवीर्य्यचेष्टः न मर्त्यस्येव मनुष्यस्येव वागादयो यत्र सः। विक्रमः पराक्रमः। वीर्य्यं शौर्य्यम्। ज्ञानादिविज्ञानबलादियुक्तः। ज्ञानं बुद्धिः। आदिपदेन तद्भेदा मेधा-विचारणा-स्मृत्यादयो गृह्यन्ते। विज्ञानं शिल्पादिविषयकं ज्ञानम्। चेष्टा पाटवम्। आदिपदेनाभिमानादि गृह्यते। नियतः वक्ष्यमाणतिथ्यादिभिः। मनोविकार उन्मादः॥ *॥

तत्र देवाविष्टस्य लक्षणमाह।

"सन्तुष्टः शुचिरतिदिव्यमाल्यगन्धो
निस्तन्द्रोऽवितथसंस्कृतप्रभाषी।
तेजस्वी स्थिरनयनो वरप्रदाता
ब्रह्मण्यो भवति नरः स देवजुष्टः"॥

अतिदिव्यमाल्यगन्धः अतिशयो दिव्यमाल्यस्येव गन्धो यस्य सः। निस्तन्द्रः निद्रारहितः। अवितथं सत्यम्। ब्रह्मण्यः ब्राह्मणभक्तः॥ *॥

दैत्याविष्टमाह।

"संस्वेदी द्विजगुरुदेवदोषवक्ता
जिह्माक्षो विगतभयो विमार्गदृष्टिः।
सन्तुष्टो भवति न चान्नपानजातै-
र्दुष्टात्मा भवति स देवशत्रुजुष्टः"॥

विमार्गदृष्टिः कुमार्गरतः। दुष्टात्मा दुष्टस्वभावः।

गन्धर्व्वाविष्टमाह।

"हृष्टात्मा पुलिनवनान्तरोपसेवी
स्वाचारः प्रियपरिगीतगन्धमाल्यः।
नृत्यन् वै प्रहसति चारु चाल्पशब्दं
गन्धर्व्वग्रहपरिपीड़ितो मनुष्यः"॥

हृष्टात्मा हृष्टजीवात्मा। पुलिनं तोयोत्थितं तटम्। वनान्तरं वनमध्यम्। तयोः सेवी। स्वाचारः अनिन्दिताचारः। प्रियाणि परि समन्ततो भावेन गीतगन्धमाल्यानि यस्य स तथा। चारुचाल्पशब्दमिति हसनक्रियाया विशेषणम्॥ *॥

यक्षाविष्टमाह।

"ताम्राक्षः प्रियतनुरक्तवस्त्रधारी
गम्भीरो द्रुतगतिरल्पवाक् सहिष्णुः।
तेजस्वी वदति च किं ददामि कस्मै
यो यक्षग्रहपरिपीड़ितो मनुष्यः"॥ *॥